**अवेल** त्रि० नास्ति वेला सीमा यत्र । १सीमारहिते निर्मर्य्यादे २अपलापे पु० ३चूर्णगुवाके स्त्री मेदि० । अप्राशस्त्ये न०त० ।४अनुचितकाले स्त्री ।न०ब० । ५समयशून्ये त्रि० ।

**अवेष्ट** त्रि० अव+यज–क्त । नाशिते "अवेष्टादंदशूकाः" य० १०,१०, "अवपूर्व्वोयजतिर्नाशार्थः" वेददी० "अवेष्टा इति लौहायसमाविध्यति" कात्या० १५,५,२२ ।

**अवैध** त्रि० विधित आगतम् अण् वैधं न०त० । १विधितः अप्राप्ते २निषिद्धे च। "अवैधं पञ्चमं कुर्व्वन् राज्ञो दण्डेन शुध्यति" स्मृतिः ।

**अवैधव्य** न० विधवाया भावः ष्यञ् वैधव्यं पतिहीनत्वम् अभावे न०त० । पतिशून्यत्वाभावे सपतिकत्वे । "अवैधव्यप्रदं स्त्रीणाम्" कालिकापुरा० "अवैधव्यं भवेत्तस्याः सप्तजन्मसु निश्चितम्" पुरा० ।

**अवैमत्य** न० वैमत्यं विरुद्धमतता अभावे न०त० । १मतद्वैधाभावे ऐकमत्ये ।न०ब० । २तच्छून्ये ।

**अवैयात्य** न० वैयात्यं धार्ष्ट्यं निर्लज्जता अभावे न०त० । धार्ष्ट्याभावे १सलज्जत्वे न०ब० । २तच्छून्ये लज्जावति त्रि० ।

**अवैर** न० अभावे न०त० । १विरोधाभावे न०ब० । २विरोधशून्ये त्रि० ।

**अवैराग्य** न० वैराग्यं विषयवितृष्णा अभावे न०त० । १विषयतृष्णायाम् २सांख्योक्ते धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्य रूपाष्टविधप्रकृतिधर्म्मभेदे च ।

**अवैलक्षण्य** न० विलक्षणस्य भावः ष्यञ् वैलक्षण्यं भेदकधर्म्मः अभावे न०त० । १भेदकधर्म्माभावे अभेदे । न०ब० । २तच्छून्ये अभिन्ने त्रि० ।

**अवोक्षण** न० अव+उक्ष–भावे ल्युट् । तिरश्चा पाणिना सेचने "उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्त्तितम् ।न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" स्मृतिः ।

**अवोद** पु० अव+उन्द–भावे घञ् नि० नलोपः । १अवक्लेदने ततः अस्त्यर्थे अर्श० अच् । क्लिन्ने २सार्द्रे त्रि० जटा० ।

**अवोदेव** अव्य० देवानामवस्तात् अव्ययी० । देवानामवरस्मिन् देशादौ "अवोदेवमुपरिमर्त्त्यं कृधि" ऋ० ७,१९,१२ ।

**अवोष** पु० अव+उष–कर्म्मणि क । उष्णाद्ये। अपूपा० हितार्थे छयतौ । अवोषीयम् अवोष्यं तद्धिते वस्तुनि त्रि० ।

**अव्द** पु० अब्दवत् । वत्सरे । [प्रत्यादयोऽप्यत्र ।

**अव्दप** पु० अब्दपवत् वर्षाधिपे अब्दपशब्दे विवृतिः । अब्द-

**अव्य** त्रि० अविभवम् अवि+दिगा० यत् । मेषभवे लोमादौ "तिरः पवित्रं विवारमव्यम्" ऋ० ९,१०९,१६ ।

**अव्यक्त** पु० वि+अनज–क्त न०त० । १विष्णौ,२कामे,३शिवे, सांख्यमते सर्व्वकारणे,४प्रधाने, रूपाद्यहीनतया चक्षुराद्यगोचरत्वात्तथात्वम्, वेदान्तमते नामरूपाभ्यामव्याकृते ५अज्ञाने ६सूक्ष्मशरीरे ७सुषुप्त्यवस्थायां च शब्दप्रवृत्तिनिमित्तैर्जातिगुणादिभिर्वर्ज्जिते निराकारे ८ब्रह्मणि न० । ९अस्पष्टे वस्तुमात्रे त्रि० । "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" सा० का० । हेतुमत्त्वादिभिर्व्यक्तधर्म्मैर्विरहितमव्यक्तम् । "अव्यक्तं त्रिगुणाल्लिङ्गात्" सा० सू० । "तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्" सा० का० । "महत्तत्त्वं सुखदुःखमोहात्मकद्रव्योपादानं सुखदुःखमोहात्मकत्वे सति कार्य्यत्वात् तथाभूतघटादिवत् । महदादिकं स्वोपहितत्रिगुणात्मकोपादानं कार्य्यत्वात् घटवत् इत्यमव्यक्तानुमानम् दर्शितम्" सा० प्र० भा० । "बुद्धेरिवाव्यक्तमुदाहरन्ति" रघुः । वेदान्तिभिः नामरूपाभ्यामव्याकृतमज्ञानमेव मूलकारणतया अव्यक्ततया च स्वीकृतं तत्रैव प्रकृतिधर्म्माणां सर्व्वेषामन्तर्भावात् "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! । अव्यक्तनिधनान्येव तत्र का परिदेवनेति" गीतोक्तेरपि तत्रैव तात्पर्य्यम् तद्द्वारैव ब्रह्मणः जगज्जन्मादिहेतुत्वम् "व्यक्तकारणमव्यक्तं नित्यं सदसदात्मकम्" मनूक्तावपि तद्रूपमज्ञानमेवाव्यक्तशब्देनाभिधीयते तस्य च प्रवाहरूपेणावस्थितत्वात् नित्यत्वम् "महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" श्रुतौ तु अव्यक्तशब्देन सूक्ष्मशरीरमिति शा० सूत्रे भाष्ये च व्यवस्थापितम् यथा "आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" सू० । "आनुमानिकमपि अनुमाननिरूपितं प्रधानमेवैकेषां शाखिनां शब्दवदुपलभ्यते । काठके हि पठ्यते "महतः परमव्यक्तमव्यक्तात् पुरुषः परः" इति तत्र य एव यन्नामानो यत्क्रमकाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायन्ते तत्राव्यक्तमिति स्मृतिप्रसिद्धेः शब्दादिहीनत्वाच्च व्यक्तमव्यक्तमिति व्युत्पत्तिसम्भवात् स्मृतिप्रसिद्धं प्रधानमभिधीयते अतस्तस्य शब्दवत्त्वादशब्दत्वमनुपपन्नं तदेव जगतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेन्नैतदेवम् नह्येतत् काठकवाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरम् नह्यत्र यादृशं स्मृतिप्रसिद्धं स्वतन्त्रं कारणं त्रिगुणं प्रधानं तादृशमत्यभिज्ञायते। शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते स च शब्दो न व्यक्तमव्यक्तमिति